स ददर्श ततस्तस्या वृत्तावूरू सुसंहतौ ।
स्तनौ च पीनौ सहितौ सुजातं चारु चाननम् ॥ १३
तां विशालायतश्रोणीं तनुमध्यां यशस्विनीम् ।
दृष्ट्वैव शुभसर्वाङ्गीं पवनः काममोहितः ॥ १४
स तां भुजाभ्यां पीनाभ्यां पर्यष्वजत मारुतः ।
मन्मथाविष्टसर्वाङ्गो गतात्मा तामनिन्दिताम् ॥ १५
सा तु तत्रैव संभ्रान्ता सुवृत्ता वाक्यमब्रवीत् ।
एकपत्नीव्रतमिदं को नाशयितुमिच्छति ॥ १६

10 For the sequence in B1, cf v l 8 Ñ1 illeg for 10^{ab} (except कपित्वे) —^{a}) Ñ2 V1 3 B1 4 D7 कपित्वाच्, D3 4 कदाचिच् (for कपित्वे) Ś1 D12 कपित्वे सा तु चार्वंगी —^{b}) Ñ2 D7 कर्हिचित्, D1 मानुषी, D3 4 वानरी (for कदाचित्) —B3 reads 10^{c}–11^{b} after 9^{ab}, repeating 10^{cd} here —^{c}) B4 तु वपु, G2 ग्रहण (for विग्रह). —^{d}) V3 D5–6 8–10 G3 M1 3 रूपयौवन-, D11 यौवनोन्मत्त- (for °त्तम-) G M1.2 -शालिनी Ñ2 V1 B1 3 (both times) 4 D7 साक्षादमरवर्णिनी

11 D5 6 8–10 M3 Ck t transp ^{ab} and ^{cd} B3 reads 10^{c}–11^{b} after 9^{ab}, repeating 11^{ab} here —^{a}) Ś1 Ñ V1 3 B1 3 (both times) 4 D1–4 7 11–13 व्यचरत् (for अचरत्) —^{b}) Ñ2 V1 3 B1 4 D2 7 11 प्रावृषि (for प्रावृड्-) Ś1 Ñ1 B3 (both times) D1 3 4 12 13 प्रावृष्यम्बुदसकुले (B3 °निभा, D1 3 °तते, D4 °गता) ❀ Cv r अचरत्पर्वतस्याग्रे प्रावृडम्बुदसंनिभे इति पाठ ❀ —^{d}) D6 महार्हा (for महार्ह-) D1 महार्हा क्षौमवाससा, D5 8–10 कदाचित्क्षौमधारिणी

12 ^{a}) Ñ2 V1 3 B1 3 4 D7 transp तस्या and वस्त्र —After 12^{a}, D4 reads 12^{d} and 12^{c}, repeating 12^{cd} in its proper place D1 transp ^{b} and ^{d} —^{b}) D4–6 8–10 13 T2 G2 पीत- (for पीतं). D6 -रक्ततर (for °दश) Ś1 Ñ1 D2 12 13 तत, D4 भुजं (sic) (for शुभम्) B1 पीत रक्त सुशोभन, D1 स्फीत रक्तच्छद शुभं —^{c}) Ś1 D12 स्थिता सा (for स्थितायाः) —^{d}) Ñ2 B3 T M1 2 [ऽ]पाहरत्, B4 प्राहरच्, D1 3 4 11 व्यहरच् (for ऽपहरच्) Ñ1 शुभ (for शनैः) Ś1 D2 12 13 मारुतोरच्छद शुभ (with hiatus), V1 पपात धरणीतले

13 ^{a}) G3 सददर्श G1 तदा (for ततस्) —^{b}) Ñ2 B1 3 D7 समाहितौ, V1 समाजितौ, B4 समाहतौ, D1 2 9 11 13 G3 M2 सुसहितौ, D4 च सहतौ, G2 सुसवृतौ (for सुसहतौ) —^{c}) Ñ2 V1 3 B3 4 D7 रुचिरौ (for सहितौ) B1 स्तनौ च पीनरुचिरौ, G3 सहतौ च स्तनौ पीनौ —^{d}) Ś1 D1 2 12 13 सुनास, Ñ1 सुनस, G1 सजात (for सुजातं) G3 चारुलोचन N2 V1 3 B1 3 4 D3 4 – 11 सुरूपौ प्रिय (D3 4 11 चारु) दर्शनौ; —After 13, D11 ins

1350* नेत्रे कमलपत्राभे सुनास चारुदर्शनम् ।

14 ^{a}) D6 8–10 यलाद् (for विशाल-) D11 विशालायतसुश्रोणीं —^{b}) Ś1 Ñ1 D2.12 13 तपस्विनीं, Ñ2 V1 3 B1 3 4 D3 4 7 अनिंदिता, G1 M2 मन° (for यशस्विनीम्) —^{c}) T2 तु (for [ऋ]व) Ñ2 V1 3 B1 3 4 D7 चारुसर्वांगीं, D2 13 शुभचार्वंगीं (for शुभसर्वाङ्गीं) —^{d}) V3 B1 3 4 D1 3 4 7 11 मारुत, G3 अभवत् (for पवन) Ś1 Ñ1 D1–4 11–13 समवेपत (D1 °पथु, D4 °क्षत) (for काममोहित)

15 ^{a}) D5 G3 सतीं (for स ता) Ś1 D2.12 13 पवन; Ñ2 D7 वृत्ताभ्या, B3 D8–10 M1 3 दीर्घाभ्या, D5 om (hapl), D6 marg (for पीनाभ्या).—Ñ1 illeg for 15^{b}–16 —^{b}) Ñ2 V1 3 B1 D7 भाविनीं, B3 कामिनीं, B4 भामिनीं (for मारुत) Ś1 D2 12 13 सुनेत्रा परिषस्वजे, D1 3 4 11 दीर्घनेत्रा परिष्वजत् (D1 11 °जन्) —D1 om 15^{c}–17^{b} —^{c}) Ñ2 V1.3 B1 3 4 D7 -गर्वात्मा (for -सर्वाङ्गो) Ś1 D2 12 13 मदनाविष्टसर्वा (D2 °सर्वविष्टा [meta])त्मा, Ck °श्लिष्टसर्वांङ्गो, Ct as in text —^{d}) Ñ2 V3 B1 D7 ते मातरम्, B3 ता मारुत (with hiatus), B4 त्वन्मातरम्, D11 गतवान्ताम् (for गतात्मा ताम्). ❀ Cv स तामित्यादौ द्वितीयस्य तच्छब्दस्य ता गतात्मेति संवन्ध । सतीमिति सम्यक् । तच्छब्दानभ्यासात् ।, Cr m g स तामिति । ता गतात्मा (Cg तद्गतचित्त । ता) पर्यष्वजतेति सबन्ध (Cr.m सतीमिति वा पाठ) ❀

16 D1 om, Ñ1 illeg for 16 (for both, cf v l 15) —^{a}) T3 त (for तु) Ś1 D3 4 12 सा तत्र कोप (D3 4 °पात्) सभ्राता, Ñ2 V1 3 B1 3 4 D7 तत्र (Ñ2 D7 °त्र) सा कोपसरक्ता (V1 3 °क्त, B3 °क्त-), D2 13 सा च तत्र सुसभ्रांता, D11 सा तत्रा सा ससभ्राता (corrupt) —After 16^{a}, G3 M1 2 (*inf lin sec m*) ins

1351* कुत्सयन्ती च मारुतम् ।
तद्ब्रह्मपि धारयन्ती

[(l 1) M2 [इ]व (for च) —(l 2) M2 धार्याशु (for धारयन्ती)]

—^{b}) Ś1 Ñ2 V1 3 B1 4 D2–4 7 11–13 M1 सुनेत्रा, B3 -लोचना, D8 10 सुव्रता (for सुवृत्ता) —^{d}) D13 अर्हति (for इच्छति).

अञ्जनाया वचः श्रुत्वा मारुतः प्रत्यभाषत ।
न त्वां हिंसामि सुश्रोणि मा भूत्ते सुभगे भयम् ॥ १७
मनसास्मि गतो यत्त्वां परिष्वज्य यशस्विनि ।
वीर्यवान्बुद्धिसम्पन्नः पुत्रस्तव भविष्यति ॥ १८
अभ्युत्थितं ततः सूर्यं बालो दृष्ट्वा महावने ।
फलं चेति जिघृक्षुस्त्वमुत्प्लुत्याभ्यपतो दिवम् ॥ १९ G. 5. 2 25 B. 4 66 21 L. 4 57. 19

17 D1 om 17^{ab} (cf v l 15) —^{b}) G2 पवन (for मारुत) Ñ2 V1 3 B1 3 4 D3 4 7 11 प्रत्यभाषत मारुत —^{c}) D5 13 न त्वा M3 (before corr. as in text, after corr *sec m*) हसामि (for हिंसामि) Ñ V1 3 B1 4 D2–4 7 11–13 कल्याणि (for सुश्रोणि) B3 स त्वा जानामि रभोरु, D1 मरुत्वानस्मि कल्याणि —^{d}) D1 3 4 11 transp भूत् and ते D5 8–10 मनसो (for सुभगे) Ś1 Ñ1 D2 12 13 मा ते भूद्बुद्धिरन्यथा, Ñ2 V1 3 B1 3 4 D7 मारुतोस्मि शुभा(B3 वरा)नने

18 ^{a}) G1 मारुतो (for मनसा) G3 सगतो (for [अ]स्मि गतो) Ñ2 V1 B1 D12 13 यस्, B3 D11 [ऽ]हं (for यत्) —^{b}) Ñ1 illeg from ष्वज्य up to तव in ^{d} D1 परिष्वग, D3 4 अभिषग (for परिष्वज्य) Ś1 D12 13 मनस्विनि, Ñ2 V1 3 B3 4 D7 तपस्विनीं (Ñ2 °नि), B1 D6 T1 G2 M3 यशस्विनीं, D2 T3 G1 3 M1 2 मनस्विनीं —^{d}) Ñ2 V1 3 B1 3 4 D1 5 7–11 transp पुत्रस् and तव D3 4 तस्मात्ते भविता सुत —For 18^{cd}, Ś1 D12 subst, while D2 cont after 1355*

1352* वीर्यवन्त महासत्त्व जनयिष्यसि शोभने ।

—After 18, S1 Ñ1 V1 B1 3 4 D1 12 13 read 27^{e} – 28^{b}
—After 18, Ñ2 V3 D5–10 S ins

1353* महासत्त्वो महातेजा महाबलपराक्रम ।
लङ्घने प्लवने चैव भविष्यति मया सम ।

[(l 1) D7 महामत्तो (for °सत्त्वो) Ñ2 V3 D7 महाकायो (for °तेजा) —(l 2) V3 क्रमणे (for प्लवने) Ñ2 वापि, V3 D7 चापि (for चैव) T1 च मत्सम, T2 3 M1 हि मत्सम ꕥ Cv r 'भविष्यति मया मम' इत्यत परमेवमुक्ता ततस्तुष्टा जननी ते महाकपे । गुहाया त्वां महाबाहो प्रजज्ञे प्लवगर्षभम् । (Cv °स्तुष्टेत्यादि-श्लोक । अस्यानन्तरम्) अभ्युत्थित तदा(Cv °त) सूर्यं बालो दृष्ट्वा महावने । फल चेति जिघृक्षुस्त्व(Cv °स्त)मुत्प(Cv °त्प्लु)त्याभ्यपतो दिवम् । इति पाठक्रम (Cv इत्येष श्लोक) ꕥ]

—Then V3 cont

1354* रामरावणयोर्युद्धे कार्यसिद्धिं करिष्यति ।

—After 18, D2 ins

1355* सा त्व केसरिण पुत्र तेजसा चापि मत्समम् ।,

while D3 4 11 ins after 18, Ñ2 D5–10 S cont l 3 only after 1353*, V3 further cont l 3 only after 1354*

1356* मम लक्ष्मीश्च तेजश्च बल वीर्यं च यादृशम् ।
तादृशेनोपपन्नस्ते श्रीमान्पुत्रो भविष्यति ।
एवमुक्ता ततस्तुष्टा जननी ते महाकपे ।
गर्भं सा धारयामास सहस्रपरिवत्सरान् ।
अथ वर्षसहस्रे वै गर्भं सधार्य साञ्जना ।
तस्मिन्नेवाचले पुण्ये सुपुवे त्वा महाबलम् ।
स त्व केसरिण क्षेत्रे सभूत शीघ्रविक्रम ।
गुहाया त्वा महाबाहो प्रजज्ञे प्लवगर्षभम् ।

[(l 2) D3 तादृश च (for तादृशेन) —(l 3) D11 श्रुत्वा (for तुष्टा) Ñ2 V3 महाबल, D7 °वने (for °कपे) —(l 4) D3 गर्भं सधारयामास सहस्र परिवासरान् —D3 4 11 om l 8 —(l 8) D7 त्वा D5 7–10 G2 प्लवगर्षभ]

—Then D3 4 11 read 28^{ab}

19 Before 19, Ñ2 V3 D2 7 G2 read 27^{c} – 28^{b}, G2 alone repeating them in their proper place D1 om 19 Ñ1 illeg upto बालो in ^{b} —^{a}) D11 M1 अभ्युद्यत (for °त्थित) Ś1 B1 D13 उद्यत हि त्व(B1 त)मादित्य, Ñ2 V1 3 B3 4 D1 2 4 7 12 उद्यत हि(D1 त) त्वमादित्य —^{b}) Ñ2 V3 B4 D7 बाल्याद् (for बालो) Ś1 Ñ1 D2 12 13 भूत्वा (for दृष्ट्वा) B1 महाचले, B3 4 °बल (for °वने) —^{d}) T2 3 G1 उत्पत्य (for उत्प्लुत्य) M1 [अ]भ्युद्यतो, M? [अ]भ्युद्गतो (for [अ]भ्यपतो) D5 6 8–10 उत्पत्याभ्युत्थि(D6 °त्याभ्याग, D9 °त्या . .)तो दिव, G2 उत्प्लुत्याभ्युत्थितो दिश ꕥ Ck t फलमिति । जिघृक्षु सन्नुत्प्लुत्य दिवमभ्युत्थितश्चेति योजना (Ct °क्षुरुत्पत्योत्प्लुत्य दिवमभ्युत्पत । 'उत्प्लुत्याभ्युत्थितो दिवम्' इति पाठान्तरे उत्प्लुत्य दिवमभ्युत्थित इति योजना) ꕥ —For 19^{cd}, Ś1 Ñ V1 3 B1 3 4 D1 2 4 7 11–13 subst

1357* ग्रहीतुकाम क्रीडार्थमुत्पपाताम्बर बली ।

[D1 वशी (for बली) Ñ2 V1 3 B1 3 4 D7 गिरेरुत्पतितो दिव, D4 11 उत्पपात भवान्(D11 गिरेर्) दिव (for the post half).]

—Then Ñ2 V1 D2 7 13 cont, while Ś1 D12 ins after 20 (first occurrence)

1358* यमेव दिवस त्व च ग्रहीतु भास्कर प्लुत ।
तस्मिन्नेव दिने राहु सजिघृक्षुर्दिवाकरम् ।
उपाजगाम त्वा दृष्ट्वा त्वरित सोपचक्रमे ।
इन्द्रस्य भवन गत्वा सह शक्रेण चाभ्ययात ।
ऐरावतस्कन्धगत दृष्ट्वा शक्र त्वमागतम् ।
समायातश्च शक्रस्त्वा कुलिशेनाभ्यताडयत् ।

[(l 1) V1 तत (for प्लुत) Ñ2 D7 भास्कर प्लुतवास्तत (for the post half) —(l 2) V1 moth eaten for राहु

2 26 शतानि त्रीणि गत्वाथ योजनानां महाकपे ।
66 22 तेजसा तस्य निर्धूतो न विषादं ततो गतः ॥ २०
57 20 तावदापततस्तूर्णमन्तरिक्षं महाकपे ।
क्षिप्तमिन्द्रेण ते वज्रं क्रोधाविष्टेन धीमता ॥ २१

ततः शैलाग्रशिखरे वामो हनुरभज्यत ।
ततो हि नामधेयं ते हनुमानिति कीर्त्यते ॥ २२
ततस्त्वां निहतं दृष्ट्वा वायुर्गन्धवहः स्वयम् ।
त्रैलोक्ये भृशसंक्रुद्धो न ववौ वै प्रभञ्जनः ॥ २३

मजिष्ठ Ś1 D2 12 13 तमेव दिवम राहु (for the prior half) —(l 3) V1 त (for त्वा) Ś1 D12 शक्र त्वान् (for त्वरित म) —(l 4) Ñ2 V1 चाभ्यगात्, D7 चाभ्ययात् (for चाभ्ययात्) —(l 5) Ñ2 D7 ऐरावतस्थ सुरपतिर्दृष्ट्वा त्वा तु समा(D7 ममुपा)गत —(l 6) D2 13 ममायात Ñ2 D7 देवराट् त्वा ममालोक्य(Ñ2 °च्य) (for the prior half)]

—After 1357*, D4 11 cont l 14–17 of 1368*.

20 Ñ1 om 20 S1 D12 read 20 twice —a) Ś1 V1 3 D1–4 11–13 (Ś1 D12 second time) गत्वोर्ध्वं, Ñ2 B1 3 4 D7 तत्रोर्ध्वं (for गत्वाथ) Ś1 D12 (first time) शतानि यातस्त्रीण्यूर्ध्वं —b) B1 महाकपि ❀ Cr m g शतानि त्रीणि, एतदनेकयोजनसहस्राणा(Cg °कशतयोजनाना)-मुपलक्षणम्। उत्तरश्रीरामायणे 'बहुयोजनसाहस्रं क्रामत्येष ततोऽम्बरात्। पितुर्बलाच्च बाल्याच्च भास्कराभ्याशमागत' इति वक्ष्यमाणत्वात् (Cg "बहुयोजनसाहस्रं क्रामत्येष" इत्युत्तरकाण्डे वक्ष्यमाणत्वात्). ❀ —G3 om (hapl) 20c – 21b —c) Ś1 Ñ2 V1 3 B1 4 D1 3 4 7 11 12 (Ś1 D12 first time) [अ]केस्य, D13 तत्र (for तस्य) —d) G1 विषाद तु (for न विषाद) Ś1 Ñ2 V1 3 B1 4 D1 3 4,7 11 12 (Ś1 D12 first time) गतस्तदा, B3 गतस्तथा, D5 8–10 M3 गतस्तत (by transp), Ct as in text (for ततो गत॰) Ś1 D2 12 13 (Ś1 D12 second time) वज्रेण च समाहत —After 20, Ś1 D2 12 13 (Ś1 D12 second occurence) ins

1359* न विषाद गतस्तत्र निपपात महीतले।

21 G3 om 21ab (cf v l. 20) B1 repeats 21ab after 21 —a) Ś1 Ñ1 D2 11–13 तस्माद्धे (D11 °दा) पततः शीघ्रम्, Ñ2 D7 तत्राव(D7 तस्माच्च)पततो ऽभ्याद्, V1 तत्र त्वं पतगो ऽभ्याद्, V3 B1(second time) 3 तत्राथ पति(V3 °त)तो ऽभ्याद्, B1(first time) M1 तवाभ्युत्पति(M1 °त)तस्तूर्णम्, D1 तत्रश्चापतित क्षिप्रम्, D4 तत आपतत क्षिप्रम्, D5 6 8–10 Ct त्वामप्युपगत तूर्णम्, G1 M2 ततोभ्यु(M2 °तो तु)पगतस्तूर्णम्, G2 (m also as in M1) तत्राप्यनागत तूर्णम्, G(ed) भवत्युत्पतिने।शीघ्रम् —b) Ñ1 illeg for क्ष महाकपे V3 D1 6 G1 M2 अतरि (D6 °री)क्षान्, G(ed) °रीक्ष (for °रिक्ष) Ś1 Ñ2 V1 B1 (second time) 3 D2 4 7 11–13 अतरि(Ñ2 B3 °री)क्षात्कपे (Ñ2 3 [illeg]) तव —For 21ab, B4 subst

1360* तत्राथ पततो ऽभ्यादन्तरीक्षान्महाकपे।

—After 21ab, D4 11 ins, while D3 subst. for 21

1361* इन्द्रेण चासि वज्रेण दिवाकरमुपस्थित ।
हनुप्रदेशेऽभिहतस्ततोऽसि पतितो दिव.।

[(l 2) D3 [ऽ]तिहत शूरोसि (for ऽभिहतस्ततोऽसि)] —Ś1 Ñ V1 B3 D1 2 7 12 13 om 21cd —c) B1 वज्र ते (by transp), B4 वज्रं वै, G1 ते वक्त्र (sic) (for ते वज्रं) —d) G1 चेतसा (for धीमता) D5 8–10 कोपाविष्टेन तेज(D6 चेत)सा —For 21cd, D4 11 subst, D3 subst for 22ab

1362* शक्रवज्रप्रहारेण वामस्ते दारितो हनु ।

22 Ñ1 illeg for 22a —a) D5 6 8–10 G1 2 M2 Ct तत्र (for तत॰) —b) Ñ1 वाममेतद् (for वामो हनुर्). —For 22ab, Ś1 Ñ2 V1 3 B1 3 4 D1 2 4 7 11–13 subst

1363* हनु शैलेन्द्रशिखरे वाम एष त्वभज्यत।

[V1 शैलाग्र, B3 शैलस्य (for शैलेन्द्र-). V3 B3 एव (for एष) D4 बभज्यत (for त्वभ°) Ś1 D2 12 13 वाममेतदभज्यत, D1 11 वामो क्षेप न्यभज्यत (for the post half)]

—For 22ab, D3 subst 1362*. —cd) Ś1 Ñ V1 B1 4 D1 2 7 12 13 तु, D6 [ऽ]पि, D8 10 [ऽ]भि- (for हि) B4 तु (for ते) V3 B3 ततस्तु नाम ते वीर (for °) Ñ2 V1 2 B4 D7 विश्रुतं, B1 3 विश्रुत, D5 8–10 G2 कीर्तित (for कीर्त्यते) D3 4 11 नाम तस्माच्च ते चक्रुर्मुनयो हनुमानिति ❀ Cv.r ततो हि नामधेय ते हनूमानिति कीर्त्यते (Cv हनुमानिति कीर्त्यते।) इत्यत पर, 'ततस्त्वा निहतं दृष्ट्वा, त्रैलोक्ये भृशसक्रुद्धो, सम्भ्रान्ताश्च सुरा सर्वे, प्रसादयन्ति सक्रुद्धं, प्रसादिते च पवने, अशस्त्रवध्यता तात, वज्रस्य च निपातेन, सहस्रनेत्र प्रीतात्मा, स्वच्छन्दतश्च मरण' इत्येते श्लोका द्रष्टव्या । एभ्योऽनन्तरं स त्व केसरिण इत्यादिश्लोक (Cr स्वच्छन्दतश्च मरण, स त्व केसरिण पुत्र', मारुतस्यौरस पुत्र इत्येष क्रम । अन्यस्तु लेखकप्रमादकृत) ❀ ।

23 Ñ2 V3 B1 3 4 D1 7 om 23–27b —a) V1 अथ त्वा Ś1 Ñ1 V1 D2–4 11–13 पतित, D8 9 G2 निहित (for निहत) —b) Ś1 Ñ1 V1 D2–4 11–13 वायु सर्वत्रगो (D3 4 11 °गतो) विभु —D13 om 23cd —c) D5 8–10 M1 Ct त्रैलोक्यं, Cv.r k त्रैलोक्ये (as in text) —d) M1 Ck स्म, Cv तु (for वै) —For 23cd, Ś1 Ñ1 V1 D2–4, 11 12, subst

1364* चकार सर्वभूतानि निरुच्छ्वासानि सर्वत ।

[V1 damaged from भू up to च्छ्वा V1 सर्वश (for सर्वत).]

सम्भ्रान्ताश्च सुराः सर्वे त्रैलोक्ये क्षुभिते सति ।
प्रसादयन्ति संक्रुद्धं मारुतं भुवनेश्वराः ॥ २४
प्रसादिते च पवने ब्रह्मा तुभ्यं वरं ददौ ।
अशस्त्रवध्यतां तात समरे सत्यविक्रम ॥ २५
वज्रस्य च निपातेन विरुजं त्वां समीक्ष्य च ।
सहस्रनेत्रः प्रीतात्मा ददौ ते वरमुत्तमम् ॥ २६
स्वच्छन्दतश्च मरणं ते भूयादिति वै प्रभो ।
स त्वं केसरिणः पुत्रः क्षेत्रजो भीमविक्रमः ॥ २७
मारुतस्यौरसः पुत्रस्तेजसा चापि तत्समः ।
त्वं हि वायुसुतो वत्स प्लवने चापि तत्समः ॥ २८

G 5 2 29
B 4 66 30
L 4 57 33

24 Ñ2 V3 B1 3 4 D1 7 om 24 (cf v l. 23) For $24-27^{ab}$, Ś1 Ñ1 V1 D2 12 13 subst 1366* —^{a}) D3 4 तु, G1 हि (for च) —^{b}) D3 4 6 11 G1 M Cv क्षोभिते, Cr as in text (for क्षुभिते) —^{c}) T त (for स-) D3 4 11 प्रसादयत देवेश, M1 प्रसादयति तं क्रुद्ध —^{d}) D3 4 11 भुवनेश्वर, M1 भुवनेश्वर

25 Ñ2 V3 B1 3 4 D1 7 om 25 (cf v l 23) For subst in Ś1 Ñ1 V1 D2 12 13, cf v l 24 and 27 —^{a}) D6 G2 तु, Cv r as in text (for च) D6 भुवने (for पवने) —^{b}) M1 transp वर and ददौ —^{c}) D3 4 11 वीर (for तात).—After 25, D3 4 11 ins

1365* यस्य देवस्य यद्वीर्यं यद्बल य पराक्रम ।
सलिलादग्नितो वायोर्दशाश प्रददौ तव ।
अवध्यता देवगणैर्नागगन्धर्वदानवै ।
अभय कामरूपित्व गतिं चाविहता तव ।

[(l 1) D11 यस्य यस्य च देवस्य (for the prior half) D11 वीर्यं (for बल) —(l 4) D4 पुन, D11 प्रभु (for तव)]

26 Ñ2 V3 B1 3 4 D1 7 om 26 (cf v l 23) For subst in Ś1 Ñ1 V1 D2 12 13, cf v l 24 and 27. —^{a}) G1 वक्त्रस्य (sic) (for वज्रस्य) D3 4 तु, G2 [अ]पि (for च) —^{b}) D9 Ck निरुज, G2 नीरुज, Cv r t as in text (for विरुज) G3 वै, Cv r as in text (for च) D3 4 11 सरुज त्वाभिवीक्ष्य तु —^{c}) D11 भीतात्मा (for प्रीतात्मा) —^{d}) D3 4 M1 ददौ वरमनुत्तम

27 Ñ2 V3 B1 3 4 D1 7 om 27^{ab} (cf v l 23) —^{a}) T2 तु (for च) —^{b}) D5 8–10 तव स्याद्, Cv r as in text (for ते भूयाद्) D6 T1 3 G1 M1 2 Cv विभो, Cr as in text (for प्रभो) D3 4 11 वीर ते(D11 मारुते)जायतामिह —For $24-27^{ab}$, Ś1 Ñ1 V1 D2 12 13 subst

1366* तत प्रजा सगन्धर्वा ससुरासुरमानवा ।
प्रजापतिं पुरस्कृत्य वायुमीयु सुखैषिण ।
प्रजापतिस्तु भगवानुवाच वचन विभु ।
अवध्यो हनुमानेष तव पुत्रो हरीश्वर ।
अस्त्राणामप्यवध्यश्च ब्रह्मादीना भविष्यति ।
बलवान्वीर्यवांश्चैव तस्मान्मारुत मा रुद ।
प्रजापतेर्वर लब्ध्वा प्रीतोऽभून्मारुतस्तदा ।
तुभ्य तदा वर दत्त्वा सह देवै प्रजापति ।
पितर ते पुरस्कृत्य प्रत्यागच्छद्यथाक्रमम् ।

[D13 om l 1–3 Ñ1 illeg from l 1 up to उवाच in l 3 —(l 1) Ś1 D12 ता प्रजाश्च (for तत प्रजा) V1 D2 read nominative singulars in place of plurals —(l 2) Ś1 एयु सुखैषिण, V1 D2 आगात्सुखैषिणी (for ईयु सुखैषिण) —(l 3) V1 D2 पवन (for वचन) —(l 5) V1 damaged after अस्त्रा up to ब्रह्मादीनां —(l 6) Ñ1 illeg from तस्मान् up to तुभ्य in l 8 V1 महाबलो वीर्यवाश्च (for the prior half) V1 moth-eaten for तस्मान्मा —(l 7) D2 13 बल (for वर) —(l 8) V1 प्रीत (for दत्त्वा) Ñ1 ** दत्त्वा वर प्रीत (for the prior half) —(l 9) D12 lacuna for ते V1 ** गच्छद् (for प्रत्या°)]

—Ś1 Ñ1 V1 B1 3 4 D1 12 13 read $27^{c}-28^{b}$ after 18, while Ñ2 V3 D2 7 G2 read $27^{c}-28^{b}$ before 19, G2 alone repeating them here V1 mostly moth-eaten for 27^{cd} —^{cd}) Ñ2 V3 B1 4 D7 क्षेत्रे (for पुत्र) Ñ1 illeg, Ñ2 B1 4 D7 सभूतोमितविक्रम, V3 मभूतो मातरिश्वना (for ^{d}) B3 तत्त्वं केशरिण क्षेत्रे मभ्रमे जातसभ्रम.—After 27, D11 ins 1369*, while K(ed) ins within brackets

1367* ईदृशस्य हि ते तात वर्णयाम कथ बलम् ।
कार्यं च लोकसमान्य कर्तु शक्तस्त्वमेव हि ।
भवाञ्जीवातवेऽस्माकमञ्जनागर्भसभव ।

28 For sequence in Ś1 Ñ V1 3 B1 3 4 D1–4 7 11–13, cf v l 18 and 19 G2 repeats 28^{ab} here (cf v l 27) Ñ1 om, G3 illeg for 28^{ab} —^{ab}) Ñ2 V1 3 B1 3 4 D7 तात (for पुत्रस्) M1 om 28^{b} V3 [अ]सि (for [अ]पि) Ś1 D1 2 12 13 पितु सम D11 औरसस्तस्य पुत्रस्च वायोरक्लिष्टकर्मण —After 28^{ab}, D3 ins, D4 11 ins l 1–7 after 28^{ab} and cont l 14–17 after 1357*

1368* त्वमेव क्रमितु शक्तो लीलया शतयोजनम् ।
सागर रत्नसपूर्णं नक्रमीनझषाकुलम् ।
अल्पमेतद्धि ते मन्ये लङ्घन लवणाम्भस ।
त्यजन्तु हरय शोक निर्मोकमिव पन्नगा ।
बल तु सुमहद्दत्त सागरप्लवनं प्रति ।
कारण तत्र वक्ष्यामि श्रोतुमिच्छथ तत्परा ।
तत कृते तु नि शब्दे विस्तीर्णे ज्ञातिमण्डले ।
पवनस्यात्मज धीमान्हनुमन्तमुवाच ह ।

30 31 33 वयमद्य गतप्राणा भवानस्मासु साम्प्रतम् ।
दाक्ष्यविक्रमसम्पन्नः पक्षिराज इवापरः ॥ २९
त्रिविक्रमे मया तात सशैलवनकानना ।
त्रिःसप्तकृत्वः पृथिवी परिक्रान्ता प्रदक्षिणम् ॥ ३०
तदा चौषधयोऽस्माभिः संचिता देवशासनात् ।
निष्पन्नममृतं याभिस्तदानीं नो महद्बलम् ॥ ३१
स इदानीमहं वृद्धः परिहीनपराक्रमः ।
साम्प्रतं कालमस्माकं भवान्सर्वगुणान्वितः ॥ ३२
तद्विजृम्भस्व विक्रान्तः प्लवतामुत्तमो ह्यसि ।
त्वद्वीर्यं द्रष्टुकामेयं सर्वा वानरवाहिनी ॥ ३३

बाल्यात्प्रभृति ते वीर श्रूयते बलमुत्तमम् ।
त्वया किल प्रसूतेन मातुरुत्सङ्गचारिणा ।
जपापीडनिभस्ताम्रो बालसूर्यो निरीक्षितः ।
तत्र कौतूहलं जातं तव स्प्रष्टुं दिवाकरम् ।
क्षेत्रदोषस्य चापत्यास्वभावमनुवर्तितुम् ।
जनन्या गिरिनिष्कम्पादुत्सङ्गादुत्पत्य सत्वरं ।
दीर्घं कृत्वात्मनो रूपमाकाशं क्रान्तवानसि ।
आसीद्योजनविस्तीर्णा अपरासीत्त्रियोजना ।
छाया विक्रममाणस्य सार वानर ते तदा ।

[(l 1) D11 अनु- (for प्र) —(l 3) D3 कृत (for कि ते) D4 त्वणाभसि —(l 5) D11 (with hiatus) भास्कर प्रवण प्रति (for the post half) —(l 6) D11 कृतमिच्छामि तत्परे (for the post half) —(l 7) D3 विस्तीर्ण- (for विस्तीर्णे) —(l 10) D3 प्रसूते हि (for प्रसूतेन) D11 -गामिना (for चारिणा) —(l. 11) D4 बाल (for बाल). —(l 13) D4 मारुत्यम् (corrupt) (for स्वभावम्) D11 मातुरुत्सङ्ग-शायिन (for the post half) —(l 16) Note hiatus between the two halves]

—G3 illeg for 28^{cd} Ñ1 illeg from वायु up to प्लवने in ^{d} —^{c}) Ñ2 V1 B1 3 4 D7 -सुतस्तात, D3 -बलस्तत्र, D4 -बलस्तात (for -सुतो वत्स) Ś1 D2 12 13 त्वं हि तावत्प्रम-स्तात, D1 त्वं हि वातसमस्तात —^{d}) Ś1 D12 जवेन, D1 प्रवणे (sic) (for प्लवने) G2 प्लवनेन (for °ने च) Ś1 Ñ1 D1 2 12 13 कपिकुञ्जर (D13 °र) (for चापि तत्समः) Ñ2 V1 B1 3 4 D3 4 7 बलवान्कपिकुंजर (D4 °र) —After 28, D3 4 ins, while D11 ins after 27

1369* वृद्धा स्म गतसत्त्वाः स्म हीनवीर्या स्म साम्प्रतम् ।
[D4 -वीर्या (for -सत्त्वा)]

29 ^{a}) B3 अभ्यागत (for अद्य गत). —^{b}) D6 T3 M3 नस्त्रातु (for अस्मासु) Ñ2 V3 B1 3 4 D7 न तथा विक्रमो (B3 वीर्य सो) स्ति न, G3 वानरा साधु साम्प्रतं —^{c}) D9 दाक्ष्ये, G1 2 M1 तार्क्ष्य, G3 पुरा (for दाक्ष्य-) —^{d}) D8–10 Ct कपि- (for पक्षि) —For 29^{cd}, Ś1 Ñ V1 3 B1 3 4 D1–4 7 11–13 subst

1370* तेजोबलसमायुक्तः पक्षिराज इवोत्तम ।
[Ñ2 V1 3 B1 4 D7 -समक्रम (for इवोत्तम) B3 पक्षिराट्-समविक्रम, D1 3 4 पक्षिराडिव चोत्तम (for the post half)]

30 Ś1 Ñ1 D1 2 12 13 om 30–31 Before 30, D3 4 (both om 32^{cd}), 11 read 32. —For 30^{ab}, Ñ2 V1 3 B1 3 4 D7 11 subst, while D3 4 subst for 30

1371* त्रिविक्रमे पुरास्माभिः कृतो विष्णुः प्रदक्षिणः ।
[V1 त्रिविक्रम, D3 4 त्रिविक्रमे B4 D3 4 11 प्रदक्षिणम् (for °णः)]

—^{c}) D6 9 11 त्रिसप्तकृत्व T2 पृथ्वी (subm) —^{d}) Ñ2 B1 3 4 D7 कृतास्माभिः; V3 चाभिरक्षा, D11 कृता चापि (for परिक्रान्ता) Ñ2 V3 D5 7 8 प्रदक्षिणा (for °क्षिणम्)

31 Ś1 Ñ1 D1 2 12 13 om 31 (cf. v l 30) —^{a}) V1 D3 4 11 यत्र, B1 D6 T2 G1 M2 3 तथा (for तदा) B3 तत्र मया (sic) (for चौषधयो) M3 (before corr) चापि (for ऽस्माभिः) —^{b}) M3 सयता (for संचिता) M1 damaged for देव —^{c}) D5 8–10 Ct निर्मथ्यम् (for निष्पन्नम्) Ñ2 V3 B1 3 4 D7 यासिम्, V1 illeg; D3 4 11 याभ्यत्र (for याभिस्) —^{d}) B1 तदानीन्, B4 D5 8–10 तदानीं (for °नीं न). B4 मे (for नो). G1 M1 महाबलम्.

32 D3 4 (both om 32^{cd}) 11 read 32 before 30 —^{a}) Ñ1 illeg up to परा in 32^{b} Ñ2 V1 B1 3 4 D7 तद् (for स) V3 तदानीम् (for इदानीम्) Ś1 महा-, Ñ2 V1 वय (for अह) Ñ2 V1 वृद्धा —^{b}) B1 3 4 D1 2 11 व्यति-क्रान्त- (for परिहीन-) Ś1 D2 12 13 प्लवने मदविक्रम, Ñ2 V1 व्यतिक्रान्तपराक्रमा, D3 4 सगक्त (D4 °क्त) शिथिलोपल —Ñ1 illeg from 32^{c} up to प्लव in 33^{b} D3 4 om 32^{cd} —^{cd}) Ś1 D2 12 13 बलम्, G3 M1 गतिद्, M2 कामम् (for कालम्) V1 साम्प्रतं मृत्युकालो नस् (for ^{c}) V1 त्वं तु, T2 भर्ता (for भवान्) Ś1 D12 -[स]चित, D5 °धिक (for °न्वित) Ñ2 V3 B1 3 4 D7 साम्प्रतं मृत्युकालो-यमतीत (Ñ2 °त) गुण (B3 गुरु) विक्रम ॥ Ct साम्प्रतं काल-मिति (Ct साम्प्रतमित्यव्ययम्। कालमिति) सप्तम्यर्थे द्वितीया। अस्माकमिति निर्धारणे षष्ठी। अस्मिन्काले ऽस्माकं मध्ये भवानेव (Ct °वाभ्यधिक) सर्वगुणान्वित इत्यर्थ ॥

33 Ñ1 illeg up to प्लव in ^{b} (cf v l 32). V3 illeg from स्व up to प्लव in ^{b} —^{a}) Ñ2 V1 B1 D10, 11 13 G2 M1 विक्रान्त, B4 विक्रान्तिं, D1 विक्रान्तुं, D3 विक्रान्त, D7 विक्रान्ते (for °न्त) Ś1 D12 तदुत्प्लव (D12 °द्विलब) स्व विक्रान्त, B3 तद्विष्टभ सुविक्रान्त, D4 तद्विर्त नभ्र निष्क्रांत —^{b}) D1 3 4, 11 हरीणाम् (for प्लवताम्) Ñ2 V1 3

उत्तिष्ठ हरिशार्दूल लङ्घयस्व महार्णवम् ।
परा हि सर्वभूतानां हनुमन्या गतिस्तव ॥ ३४

विषण्णा हरयः सर्वे हनुमन्किमुपेक्षसे ।
विक्रमस्व महावेगो विष्णुस्त्रीन्विक्रमानिव ॥ ३५

G 5 2 45
B 4 66 37
L 4 57 4

B1 4 D7 प्रवरो ह्यसि, B3 प्लवगेश्वर (for उत्तमो ह्यसि) —After 33^{ab}, Ś1 Ñ2 V1 3 B1 3 4 D2-4 7 11-13 ins

1372* योहि विक्रमते धृष्ट विक्रमे समुपस्थिते ।
पर्जन्यमिव भूतानि लोकस्तमनुजीवति ।
एतावान्पुरुषार्थो हि विक्रमस्य प्रयोजनम् ।
यस्य पौरुषमश्नन्ति मित्रस्वजनबान्धवा ।
अमरा इव शक्रस्य सफल तस्य जीवितम् ।
युक्तो यो बुद्धिशाखाभ्या प्रशस्त पौरुषेण च ।
कर्मणा चाप्युपायज्ञ सोऽस्या धुरि नियुज्यते ।
तदप्रमेय वचन सम्यग्विज्ञाय तत्त्वत ।
हनूमन्तमथोचुस्ते लङ्का गच्छेति वानरा ।
दर्शयस्व महातेजो लोके लोकाधिपो ह्यसि ।
अप्रमेयाप्रमेयस्य पार गच्छ महोदधे ।
विस्मापय जगत्सर्वं विक्रमस्व दिव कपे ।
सीतायाश्चिरनष्टायास्त्वमद्य पदवीं चर ।
कथ्यता त्रिषु लोकेषु कर्म ते पुण्यकर्मण ।
अमानुषमिद कर्म लङ्घन लवणाम्भस ।
यशसा योजयात्मानमायुषा चापि बान्धवान् ।
निर्देशसिद्ध्या भर्तार परिज्ञानेन राघवम् ।

[(l 1) Ś1 D2-4 11-13 तु (for हि) Ś1 D12 [ऽ]दृष्टो, Ñ2 V3 दृष्ट्वा, B4 D7 दृष्टो, D3 4 विश्व (for धृष्ट) V3 B3 विषमे (for विक्रमे) B4 पयुपस्थिते, D3 4 11 प्रत्युपस्थिते —(l 2) Ñ2 लोके ममनु- (for लोकस्त°) —(l 3) Ś1 V1 D2-4 12 13 एतावत्, B3 एतेन (for °वान्) Ś1 D2 12 13 पुरुषार्थ (for र्थो) Ś1 D2-4 11-13 विक्रमश्च (D2 3 °स्व, D11 °स्तु) महामते (for the post half) —Ś1 D2-4 11-13 read l 4 after l 7 —(l 4) Ś1 D2 12 13 तस्य (for यस्य) D11 इच्छति (for अश्नन्ति) —Ś1 D2 12 13 om l 5 —(l 5) D3 4 11 स महान्सर्वलोकस्य दैवतैरपि पूज्यते —(l 6) V1 transp युक्तो and यो Ś1 D2-4 11-13 यो युक्तो योगशास्त्राभ्या (for the prior half) Ś1 D2-4 11-13 प्रयुक्त, Ñ2 प्रकृष्ट, D7 प्रहृष्ट (for प्रशस्त) D11 हि (for च) —(l 7) Ś1 Ñ2 B4 D11 12 कर्मणा V3 अपि (for चापि) D3 सौम्य (for सोऽस्या) B3 सोन्मामिर्विनियुज्यते, D13 स साधुरिति युज्यते (for the post half) —After l 7, Ś1 D2-4 11-13 read l 4 —(l 8) B3 4 D2 4 7 13 तदप्रमेय D11 विंध्यो (sic) (for सम्यग्) Ś1 D2-4 11-13 भाषित (for तत्त्वत) B3 श्रुत्वा वाक्य तु तत्त्वत (for the post half) —(l 9) Ś1 D2-4 11-13 अ(D2 त)थोचुस्तुमान्यत्र वानरा वानरर्षभ —(l 10) B3 दर्शयाशु (for °यस्व) V1 महा. (moth-eaten), B1 4 D7 महत्तेजो (for महातेजो) D3 4 हरे, D7 lacuna, D11 त्व च (for लोके) V3 B3 4 लोकाधिको (for °धिपो) Ś1 D2 12 13 विक्रमश्च महत्(D13 महा)तेजो लवने साधको ह्यसि —(l 11) B3 अपारस्याप्रमेयस्य (for the prior half) Ś1 D2-4 11-13 पर पार, B3 गच्छ पार (by transp), B4 पार गतु (for पार गच्छ) —(l 12) Ś1 V1 D2 4 12 13 विस्मापयन् (for °पय) Ś1 D2-4 11-13 प्रक्रमस्व महामते (for the post half) —(l 13) Ś1 B1 D2-4 11-13 व्रज (for चर) —(l 14) D3 कथ्यते (for °ता) Ś1 D2-4 11-13 त्वयश पुण्यकर्ममि (D13 °णि) (for the post half) —(l 15) Ś1 D2-4 11-13 अनौ(D3 °नु [sic])पम्यम् (for अमानुषम्) D7 लघने V3 B4 लवणाबुने (for °णाम्भस) —(l 16) B3 [अ]स्मान् (for [आ]त्मानम्) B4 वानरान् (for बान्धवान्) Ś1 D2 12 13 हर ज्ञातिसुदुष्कृत, B3 हरिराजो गुणैरपि, D3 4 11 हरिज्ञाति(D11 °तीन्)गुणैरपि (for the post half) —(l 17) V1 3 B1 4 निदेश- (for निर्देश-) B3 राजान (for भर्तार) Ś1 D2-4 11-13 परित्राणेन (for °ज्ञानेन)]

—Before 33^{cd}, Ś1 D2 12 13 read 35 —^{c}) D1 त्वदीय, D8 तद्वीर्यं (for त्वद्वीर्यं) D6 8-10 हि (for [इ]य) —^{d}) Ś1 Ñ1 D2 12 13 समग्रा हरिवाहिनी

34 ^{a}) D1 कपिशार्दूल, M1 ह॰ र्दूल (damaged) —^{c}) G3 M2 3 वरा, Ck t as in text (for परा) Ś1 Ñ V1 3 B1 3 4 D1-4 7 11-13 वायोरपि गतिर्नपा (B3 गतिप्रेक्ष्य [sic], B4 महातीवा) —^{d}) D6 वि- (for या) D13 या हनूमन (for हनुमन्या) D2 या गतिर्हनुमस्तव

35 Ñ1 om 35-36 Ś1 D2 12 13 read 35 before 33^{cd} —^{a}) Ś1 D1 2 12 13 विषण्णास्तु हरीन्सर्वान्, Ñ2 V1 B1 3 4 D7 विषण्णान्प्लवगान्सर्वान् —^{b}) D1 10 T2 उपेक्ष्यसे (D1 °सि), Ck t as in text (for °क्षसे) —B3 om 35^{cd} —^{c}) Ś1 D1 2 12 13 महाभाग, Ñ2 V3 B1 4 D3 4 7 11 °बाहो, D5 6 8-10 G1 2 M1 2 °वेग (for °वेगो) —^{d}) D7 विष्णोस् D1 त्रिविक्रमानिव, D13 त्रीन्विक्रमाणि च (corrupt) (for त्रीन्विक्रमानिव) G M2 यथा विष्णुस्त्रिविक्रमे —After 35, Ś1 Ñ2 V1 3 B1 3 (after 35^{ab} owing to om) 4 D2-4 7 11-13 ins

1373* समर्थो ह्यनिलस्यापि गतिं गन्तु सुदुर्गमाम् ।

[Ñ2 V1 D7 [ऽ]सि (for हि) Ś1 B3 D12 [अ]निलस्याप्य(B3 °पि), D2.4 11 13 [अ]निलस्यासि (for [अ]निलस्यापि) B3 गतिं हतु सुदुर्लभा (for the post half)]

6 8 7 ततस्तु वै जाम्बवताभिचोदितः
प्रतीतवेगः पवनात्मजः कपिः ।
प्रहर्षयंस्तां हरिवीरवाहिनीं
चकार रूपं महदात्मनस्तदा ॥ ३६

इति श्रीरामायणे किष्किन्धाकाण्डे पञ्चषष्टितमः सर्गः ॥ ६५ ॥

६६

संस्तूयमानो हनुमान्व्यवर्धत महाबलः ।
समाविद्ध्य च लाङ्गूलं हर्षाच्च बलमेयिवान् ॥ १
तस्य संस्तूयमानस्य सर्वैर्वानरपुंगवैः ।
तेजसापूर्यमाणस्य रूपमासीदनुत्तमम् ॥ २

36 Ñ1 om 36 (cf v l 35) —a) G1 M2 स्तवैर्, M1 स्तुतो (for तु वै) I M3 प्रचोदित (for [अ]भि°) Ś1 Ñ2 V1 3 B1 3 4 D1–4 7 11–13 तत कपीना प्रवरेण चो (D1 3 4 नो)दित (Ś1 D2 12 13 देशित), D5 6 8–10 G3 Ct तत कपीनामृषभेण चोदित ❀ Ct . कपीनामृषभेण । कपिशब्दोऽत्र छत्रिन्यायेन ऋक्षसाधारण ❀ —b) D7 स भीम (for प्रतीत-) B4 तथा (for कपि) —c) D4 प्रदर्शयस् (for प्रहर्ष°) Ś1 D2 12 13 कपिवाहिनीं तदा, Ñ2 V1 3 B1 3 4 D7 हरिवाहिनीं तदा, D1 3 4 6 G1 हरि(D1 कपि)-राज(G1 °यूथ)वाहिनीं (for हरिवीर°) —d) Ś1 D2 12 13 प्लवनाय देशि(L [ed]°श)त , Ñ2 V3 B1 4 D1 7(marg) प्लवनाय विश्रुत(D1 निश्चित , G [ed]विस्तृतं), V1 प्लवगोपविश्रुत, B3 प्लवगोपरिस्थित, D11 सुमहन्महात्मा (for महदात्मनस्तदा) D3 4 चकार बुद्धिं प्लवनाय निश्चिता ❀ Cv r चकार रूप महदात्मनस्तदेति सम्यक् (Cr °ति पाठ) ❀

Colophon —*Kānda name* Ñ2 V3 B1 3 4 D7(m) सुन्दरकाडे —*Sarga name* Ś1 Ñ1 D2 12 13 हनुमत्प्रोत्साहन(Ñ1 °नो), Ñ2 V1 D7 हनुमदुत्तेजन, V3 हनुमत्प्रशसा, B1 हनूमतप्रेषण, B3 4 हनूमत्तेजन, D1 हनूमत्तेजो, D3 4 हनुमत्सतेजनो, D11 हनूमत्सतेजो —*Sarga no* (figures, words or both) Ś1 Ñ1 V1 B1 D2 4 12 13 om , Ñ2 V3 B3 4 D7 2, D1 39, D3 G3 65 (as in text), D5 T2 63, D6 8–10 T1 3 G1 2 M2 3 66, D11 64, M1 67 —After colophon, D2 concludes with राम, G with श्रीरामाय नम

66

M1 begins with श्रीरामाय नम Before 1, D5 6 8–10 T G2 3 M2 3 ins , while G1 M1 ins after 3

1374* त दृष्ट्वा जृम्भमाण ते क्रमितु शतयोजनम् ।
वीर्येणापूर्यमाणं च सहसा वानरोत्तमम् ।
सहसा शोकमुत्सृज्य प्रहर्षेण समन्विता ।
विनेदुस्तुष्टुवुश्चापि हनूमन्त महाबलम् ।
प्रहृष्टा विस्मिताश्चैव ते वीक्षन्ते समन्तत । [5]
त्रिविक्रमकृतोत्साह नारायणमिव प्रजा· ।

[(l 1) G1 योजन शत (for शतयोजनम्) —(l 2) D5 8–10 वेगेन, Cv r as above (for वीर्येण) D6 तु, G2 M1 त, Cv r as above (for च) M2 पूर्यमाण त. G1 2 M1 वानरोत्तमा (G2 [before corr] °म), Cv r as above (for °त्तमम्) —(l 4) T2 महाकपिं (for °बलम्) —(l. 5) D9 प्रहृष्ट- D5 8–10 T1 M2 Cr [अ]पि, Cv as above (for [ए]व) D6 ते वीक्ष्यते, G1 M3 वीक्षते च (M3 स्म), Cv r as above (for ते वीक्षन्ते) Cv परस्पर —(l 6) D5 8–10 त्रिविक्रम, Cv r as above (for °क्रम-). ❀ Cv r त दृष्ट्वा जृम्भमाण ते°, वीर्येणापूर्यमाण च°, सहसा शोकमुत्सृज्य°, विनेदुस्तुष्टुवुश्चापि°, प्रहृष्टा विस्मिताश्चैव(Cr °श्चापि)°, त्रिविक्रमकृतोत्साह° इति पाठक्रम (Cr °त्येष पाठक्रम । एतेषा श्लोकाना केषुचित्कोशेषु भ्रशो लेखकप्रमादकृत) ❀]

1 Ñ1 illeg up to व्यवर्ध in b D7 reads 1 in marg —b) B1 अवर्धत, B4 प्रावर्धत, D3 व्यावर्धत (for व्यवर्धत) Ñ2 V1 3 B3 4 D1 7 T2 3 M1 महाकपि (for °बल·) —c) V3 B1 D1 2 6 समाविद्धयत (for °विद्ध्य च) ❀ Ck t समाविद्ध्यास्फाल्य ❀ —d) Ś1 Ñ1 V1 D12 चरणैश्चाचलोपम , Ñ2 V3 B1 3 4 D7 चरणौ चात(B3 चडि)-कोपम , D1–4 11 13 चरणौ चा(D1 च, D4 वा)चलोपम (D13 °मौ), D5 8–10 हर्षाद्बलमुपेयिवान्

2 a) D1 मत्य-, D7 marg (for तस्य) —D12 om (hapl.) from 2b up to the prior half of l 1 of 1375* D1 om (hapl) 2bc —b) Ś1 वृद्धिर्, Ñ V1 3 B1 3,4 D2–11 13 G3 M1 3 वृद्धैर् (for सर्वैर्) Ś1 Ñ1 D2 13 G2 यूथपै (for पुगवै) —c) Ś1 पूज्यमानस्य (for [आ]पूर्यमाणस्य) —d) G1 रविर् (sic), M1

यथा विजृम्भते सिंहो विवृद्धो गिरिगह्वरे ।
मारुतस्यौरसः पुत्रस्तथा सम्प्रति जृम्भते ॥ ३
अशोभत मुखं तस्य जृम्भमाणस्य धीमतः ।
अम्बरीषोपमं दीप्तं विधूम इव पावकः ॥ ४

हरीणामुत्थितो मध्यात्संप्रहृष्टतनूरुहः ।
अभिवाद्य हरीन्वृद्धान्हनुमानिदमब्रवीत् ॥ ५
अरुजन्पर्वताग्राणि हुताशनसखोऽनिलः ।
बलवानप्रमेयश्च वायुराकाशगोचरः ॥ ६

G 5 3 35
B 4 67 9
L 4 58 37

वीर्यम् (for रूपम्) Ś1 च दुर्गम, D1 तदद्भुत (for अनुत्तमम्) —After 2, Ś1 V1 3 B4 D1–4 12 (after 2^{a} owing to om) 13 G (ed) (l 5–6 only) ins , while Ñ2 B1 3 D7 subst l 5 only for 3^{ab}

1375* कपिभि स्तूयमानस्य तदा बलवतो बलम् ।
ववृधे हृष्टमनस पर्वणीव महोदधि ।
आत्मस्थेनैव तोयेन वर्धते सागरो यथा ।
तथात्मस्थेन वीर्येण प्रवृद्ध कपिकुञ्जर ।
यथा चन्द्रमसो वृद्ध्या पूर्यते सागरोऽम्भसा । [5]
ववृधे स्तूयमानस्य तथा वीर्यं हनूमत ।

[Ś1 V1 om l 1–2 —(l 1) V3 D2 13 कपे सन्नूयमानस्य, D12 om (for the prior half) —D2 13 om from तदा up to हृष्टमनस in l 2 —(l 2) D12 प्रवृद्ध-, L (ed) प्रवृद्ध (for ववृधे) D12 महोदधे —V1 transp l 3–4 and 5–6 —(l 3) D1 12 तु (for [ए]व) D4 रोचेन (for तोयेन) V3 B4 ववृधे (for वर्धते) —D1 om l 4 Ś1 reads l 4–5 in marg —(l 4) B4 [आ]त्मस्थेनैव (hypm), D4 स्वरनेन (for [आ]त्मस्थेन) V1 प्रवृधे, D2 13 ववृधे (for प्रवृद्ध). V3 B4 D3 4 ववृधे (D3 4 °र्धते) हरिपुंगव (for the post half) —(l 5) D4 वृध्या (for वृद्ध्या) Ś1 D12 वर्धते, D2 13 ववृधे (for पूर्यते) —(l 6) D2 13 स यथा तस्मात् (for स्तूयमानस्य) V1 तदा हनुमतो बल (for the post half)]

3 ^{a}) D2 तथा (for यथा) V3 हि जृंभत , G1 विजृम्भित (for विजृम्भते) —^{b}) Ś1 Ñ1 D1 2 11–13 विवृद्धो, B4 प्रवृद्धो, D3 4 प्रबुद्धो, D5 8–10 विवृते (for विवृद्धो) V3 काननान्तरे, L (ed) काननान्तरे (for गिरिगह्वरे) —For 3^{ab}, Ñ2 B1 3 D7 subst l 5 of 1375* T2 om 3^{cd} —^{cd}) Ñ1 illeg from म up to स्य in 4^{b} Ś1 D12 13 समुपजृम्भते, Ñ2 V1 3 B1 3 4 D3 7 11 स (B4 स) प्रत्यजृंभ (B3 °दृश्य)त, T3 स प्रतिजृम्भते, G1 M2 सम्प्रविजृम्भते, G3 M1 प्रतिविजृम्भते, L (ed) समुपजृंभित (for सम्प्रति जृम्भते) G2 तथा विवृद्धो हनूमान्स्तूयमान सुविक्रम —After 3, V3 B4 ins , while D11 cont after 1378*

1376* अवर्धतास्य लाङ्गल चकम्पे च महाबल ।
ननाद च महानाद त्रिदिव नादयन्निव ।

[(l 1) D11 प्रचकर्ष च (for अवर्धतास्य) V3 चकप (for चकम्पे) D11 तच कृते महाकपि (for the post half)]

—After 3, G1 M1 ins 1374*

4 Ñ1 illeg up to स्य in ^{b} (cf v l 3) —^{c}) B3 दिव्य (for दीप्त) Ś1 Ñ1 D1–4 11–13 तरुणादित्यसकाश (D11 °शो), D5 तच्चाप्यनुपम दीप्त, D6 G2 M3 अबरीषमिवा(D6 °व)दीप्त —^{d}) V1 D1 4 विधूममिव पावक ❀ Cv अम्बरीषोपम दीप्त विधूममिव पावकम् । इव दीप्तमित्यन्वय । अम्बरीष भ्राष्ट्रम् । अत पर तस्यास्यमित्यादय केचन श्लोका क्वचित्क्वचित्कोशेपु दृश्यन्ते ।, Cr "अम्बरीषमिवादीप्त विधूममि(इ ?)व पावक " इति पाठ । आदीप्तमम्बरीषमिव स्थित जृम्भमाणस्य तस्य मुख विधूम पावक इति । अशोभतेति सबन्ध । अम्बरीष भ्राष्ट्रम् । "क्लीबेऽम्बरीष भ्राष्ट्रो ना " इत्यमर ।, Cm g आदीप्तमम्बरीषमिव स्थित जृम्भमाणस्य तस्य मुख विधूम पावक इवाशोभत (Cm °तेति सबन्ध । अम्बरीषमिवादीप्तमिति च पाठ ।) अम्बरीष भ्राष्ट्रम् (Cm °ष्ट्रमिव स्थितम्) । "क्लीबेऽम्बरीष भ्राष्ट्रो ना " इत्यमर ।, Ck अम्बरीष भ्राष्ट्रम् । "क्लीबेऽम्बरीष भ्राष्ट्रो ना " । आदीप्त प्रबलम् । अत एवाङ्गारवर्णप्रतप्तभ्राष्ट्रोपम तस्य मुखमशोभत । स तु सर्वात्मना विधूम पावक इवाशोभत । "अम्बरीषोपम दीप्त विधूम इव पावक " इति पाठ ।, Ct अम्बरीषोपम दीप्त विधूम इव पावक इति प्राचीन पाठ ❀ —After 4, V3 B4 ins

1377* तस्य सजृम्भमाणस्य शुक्लदंष्ट्रामिज्वलत् ।
ददृशेऽर्क इवास्ताद्रौ रश्मिजालैरिवावृत ।

—Then V3 B4 cont , while D3 4 11 ins after 4

1378* पीतभास्वररोम्णा च लाङ्गूलेन महाकपि ।
पद्मकेसरदाम्नेव बभूव समलङ्कृत ।

[(l 1) D3 -भास्कर-, D11 -भासुर- (for -भास्वर-) V3 B4 -रोम्ना (for -रोम्णा) D3 तु (for च) D4 पीनभारश्च रोम्णा तु (for the prior half) V3 B4 महाबल (for °कपि) —(l 2) V3 B4 -केशर- D3 4 दीप्तेन (for -दाम्नेव)]

—Thereafter D11 cont 1376*

5 ^{a}) V1 illeg for मध्यात् —^{b}) D10 13 स प्रहृष्ट- —V1 reads 5^{cd} in marg —^{c}) Ñ2 V1 3 B1 3 4 D7 कपीन्, M1 ततो (for हरीन्) Ś1 Ñ1 D1–3 12 13 सर्वान् (for वृद्धान्) —Ñ1 illeg from 5^{d} up to l 2 of App I (No 25) —^{d}) Ś1 Ñ2 V1 B1 3 4 D2 7 12 13 इद वचनम् (for हनुमानिदम्) —After 5, Ś1 Ñ V1 3 B1 3 4 D1–4 7 11–13 ins a passage relegated to App I (No 25)

6 Ñ1 illeg up to न in ^{b} (cf v l l 51 of App I [No 25]) —^{a}) D6 9 आरुह्य, T1 G2 M1 Cr t आरु

35 10 38 तस्याहं शीघ्रवेगस्य शीघ्रगस्य महात्मनः ।
मारुतस्यौरसः पुत्रः प्लवने नास्ति मे समः ॥ ७
उत्सहेयं हि विस्तीर्णमालिखन्तमिवाम्बरम् ।
मेरुं गिरिमसंगेन परिगन्तुं सहस्रशः ॥ ८
बाहुवेगप्रणुन्नेन सागरेणाहमुत्सहे ।
समाप्लावयितुं लोकं सपर्वतनदीह्रदम् ॥ ९
ममोरुजङ्घावेगेन भविष्यति समुत्थितः ।
संमूर्छितमहाग्राहः समुद्रो वरुणालयः ॥ १०
पन्नगाशनमाकाशे पतन्तं पक्षिसेवितम् ।
वैनतेयमहं शक्तः परिगन्तुं सहस्रशः ॥ ११

जन्, G1 M2 विरुजन, Cm g °जत्, Ck as in text (for अरुजन्) Ś1 D2–4 12 13 अ(Ś1 आ) रूप (D3 4 °रूपी) सर्वभूतात्मा, Ñ2 V1 3 B1 3 4 D1 7 प्राणद (D1 स्वरूप) सर्वभूताना, D11 आश्रय सर्वभूतात्मा —b) Ś1 B3 -समोनिल, D6 -सम्रानिल, D7 -सुखोनिल (for -मशोऽनिल) —c) Ñ2 V1 3 B1 3 4 D7 वेगवान (for बल°) B3 अप्रमत्तश्, G3 अप्रमेयेश् (for अप्रमेयश्) —d) D3 4 वायुम्तामभजद्वने

7 D12 om 7 —a) Ñ1 illeg from च्र up to परिगन्तु in 8d Ñ2 V3 B1 3 4 D1–4 7 11 13 भीम- (for शीघ्र) Ś1 -वेगेन (for -वेगस्य) —b) G3 शीघ्रगश्च, M3 °वेगो, Cr m g as in text (for शीघ्रगस्य) V1 महा * * (damaged) (for महात्मन) —d) Ñ2 V1 B1 3 4 D1 3 5 7 11 T G2 M मत्सम (for मे सम) V3 D4 6 8–10 G1 3 Ct प्लवनेनास्ति(V3 G1 °पि) तत्सम —After 7, D11 ins

1379* अहमेन तरिष्यामि लीलया शतयोजनम् ।
सागर रत्नसंपूर्ण पश्यन्तु हरियूथपा ।
अल्पमेतन्मम व्रत लङ्घन लवणाम्भस ।

—Thereafter cont l 2 of 1387*

8 Ñ1 illeg up to परिगन्तु in d (cf v l 7) —ab) V1 illeg from य up to वा Ś1 Ñ2 B1 3 4 D1–4 7 11–13 उत्सहे चापि, M1 उत्सहेय हि, M2 उत्मा(after corr sec m °त्स)हेह हि, Cr °हे हं हि, Cm g as in text (for उत्सहेय हि) Ś1 Ñ2 B1 3 4 D1–4 7 11–13 उल्लिखतम् (for आलि°) V3 उत्सहे मह तर्णमखिल तचाहर्णव (corrupt) —c) Ñ2 D7 शिखरिणा श्रेष्ठ, B3 D5 गिरीशमगेन, D8 गिरिं ममगेन (for गिरिमसंगेन) —d) D3 4 गिरि गतु (for परि°) V3 अह क्षम, B3 सहस्रधा (for सहस्रश) ❀ Ck t सहस्रश परिगन्तुमुत्सह इति। सहस्रवारमेकयत्नेन (Ct °त्सहे। एकेनैव वेगेन सहस्रवार) प्रदक्षिण कर्तुं शक्नोमीत्यर्थ (Ct °त्याशय) ❀ —After 8, Ś1 Ñ1(illeg for 12ab) D1–4 12 13 read 12, while V3 repeats (var) l 3–4 of App I (No 25).

9 D11 om 9 Ñ1 illeg for 9ab Ś1 D1–4 12 13 transp 9 and 10 reading them after 14ab Ñ2 V1 (illeg for 9a) 3 B1 3 4 D7 transp 9 and 10 —a) B4 D2 13 वायु- (for बाहु-) B3 -प्रमुक्तेन (for -प्रणुन्नेन) —b) D1 3 4 M1 ममुत्सहे (for [अ]हमुत्सहे) Ś1 Ñ2 V1 3 B1 3 4 D2 7 12 13 समुद्रेण समुत्सहे —After 9ab, M2 ins

1380* एकेन प्लवनेनैव लङ्कायामहमापते ।

—c) Ñ2 B4 D7 सर्वां प्लावयितु, V1 . यितु (illeg), D6 सम प्ला° (sic), (for समाप्लावयितु) Ś1 D1–4 12 13 लोकान्, Ñ2 V1 3 B1 3 4 D7 लका (for लोक) Ñ1 समाप्लाव (illeg) —d) G2 3 सर्वत स- (for सपर्वत-) Ś1 Ñ1 D2–4 12 13 -वनद्रुमान, Ñ2 V1 3 B1 4 D7 वनद्रुमा, D1 -वनह्रदान्, G1 M2 -नदीनद, M1 -नदीगुह (for -नदीह्रदम्) B3 समाकारा वरद्रुमा

10 Ś1 D1–4 12 13 transp 9 and 10 reading them after 14ab Ñ2 V1(illeg for 9a) 3 B1 3 4 D7 transp 9 and 10 Ñ1 illeg for 10–11 —a) Ś1 Ñ2 V1 3 B1 3 4 D1–4 7 12,13 -भुज, D6 8–10 M3 Cm -जघ- (for -जङ्घा) ❀ Cm ऊरू च जङ्घे चोरुजङ्घ तस्य वेगेन। प्राण्यङ्गत्वादेकवद्भाव ❀ —b) Ś1 समुद्भुत, Ñ2 V3 B1 3 4 D1 3–7 12 G2 3 M1 समुद्धत, D13 समुद्यत, Ct as in text (for समुत्थित) —c) V3 illeg from मू up to समुद्रो in d Ñ2 D2 7–10 13 Ct समुत्थित-, B3 D1 5 6 G1 M समुच्छ्रित- (for समूर्छित-) —V1 damaged for d —d) M1 समग्रो (for समुद्रो) V3 मकरालय (for वरुणा°) —For 10, D11 subst

1381* ममोरुभुजवेगेन क्षोभ्यमाण महार्णवम् ।
नृत्यन्तमिव वीचीभि पश्यन्तु वनगोचरा ।

11 D11 om 11, Ñ1 illeg for 11 (for Ñ1, cf v l 10) D1–4 12(after 1384*) 13 read 11 after 13ab V3 repeats 11ab after 11 —a) V1 moth-eaten from गा up to b B3 आकाश —b) D3 पतग, D5 पतत, D13 सतत (for पतन्त) Ś1 D12 क्षिप्रमेव त, Ñ2 V3 (both times) B1 3 4 D1–7 13 T3 पक्षिसेविते —After 11ab, Ś1 reads 13ab (including 1384*) —c) V1 अभिभूय जवे* * (= prior half of 1382*). —d) V3 मत्समम (for सहस्रश) —For 11cd, Ñ2 B1 3 4 D7 subst, while V3 ins after the repetition of 11ab

1382* अभिभूय जवेनाशु लङ्का सपादयेद्ध्रुवम् ।

[D7 [इ]त्युर् (for [आ]शु) D7 लक्ष्य (for लङ्का) V3

उदयात्प्रस्थितं वापि ज्वलन्तं रश्मिमालिनम् ।
अनस्तमितमादित्यमभिगन्तुं समुत्सहे ॥ १२
ततो भूमिमसंस्पृश्य पुनरागन्तुमुत्सहे ।
प्रवेगेनैव महता भीमेन प्लवगर्षभाः ॥ १३
उत्सहेयमतिक्रान्तुं सर्वानाकाशगोचरान् ।
सागरं क्षोभयिष्यामि दारयिष्यामि मेदिनीम् ॥ १४
पर्वतान्कम्पयिष्यामि प्लवमानः प्लवंगमाः ।
हरिष्ये चोरुवेगेन प्लवमानो महार्णवम् ॥ १५
लतानां वीरुधां पुष्पं पादपानां च सर्वशः ।
अनुयास्यति मामद्य प्लवमानं विहायसा ।
भविष्यति हि मे पन्थाः स्वातेः पन्था इवाम्बरे ॥ १६

G 5 3 44
B 4 67 20
L 4 58 48

D7 सपात्ये B1 लङ्का सपातये भ्रुम, B1 लङ्का पातो ममाद्य व (for the post half)]

—Thereafter V3 cont

1383* पतग पुनराकाशे पतन्त विष्णुविक्रमे ।

12 Ś1 Ñ1 (illeg for 12^{ab}) D1–4 12 13 read 12 after 8 Ñ2 V1 3 B1 (preceded by 1385*) 3 4 D7 read 12 after 13^{ab} —a) Ś1 D11–13 T G2 3 M1 2 प्रस्थित चापि, Ñ2 V1 3 B1 3 4 D7 उत्थित चाह, D1 3 4 पर्वतश्रेष्ठाज् (for प्रस्थित वापि) —b) Ñ2 V1 B1 3 D7 स्वतेजो (for ज्वलन्त) —c) Ñ2 B4 अनत गतम्, V1 3 B1 3 D7 °स्तगतम् (for अनस्तमितम्) —d) D5 8–10 Ct अहं गतु, D6 अभियातु, Cv r m g k as in text (for अभिगन्तु) Ś1 Ñ1 D1–4 11–13 अभ्यतिक्रातुमुत्सहे, Ñ2 D7 अपि विक्रातुमुत्सहे, V1 3 B1 3 4 अप्य (V1 ✱ ✱) तिक्रातुमुत्सहे —After 12, V3 D2 6 11 13 T1 M1 ins, while Ś1 ins after 13^{ab}, whereas D12 subst for 13^{ab}

1384* पृथिव्या दक्षिणादन्तादुत्तर गन्तुमुत्सहे ।

[D13 T1 M1 पृथिव्या D11 दक्षिणा गत्वा, T1 दक्षिणादस्माद् (for दक्षिणादन्ताद्) T1 उत्तरा (for °र) Ś1 D2 ओजसा (for उत्सहे) D12 उ ✱ . उत्सहे (for the post half)]

13 Ñ1 illeg from 13 up to प्लवमानो in 15^{d} T2 3 om (hapl) 13^{ab} Ś1 reads 13^{ab} (including 1384*) after 11^{ab} —a) D1 5 6 8–10 Ct असस्पृष्ट्वा, Cr m g as in text (for °स्पृश्य) Ś1 D2 3 13 तथा (D3 तो) हं भूमिमुत्सृज्य, Ñ2 V1 3 B1 4 D7 अ (B1 4 स) स्पृशन्भुवमागतु, B3 असस्पृश्य भुवमागतु, D4 ततोह भूरिय स्पृष्ट्वा, D11 ततश्च भूमिमस्पृश्य —b) Ñ2 V1 3 B1 3 4 D7 अप्यहम् (for आगन्तुम्) —For 13^{ab}, D12 subst 1384* —After 13^{ab}, Ś1 ins 1384*, Ñ2 V1 3 B1 (preceded by 1385*) 3 4 D7 read 12, while B1 ins

1385* इति य तर्कयिष्यन्ति सिद्धाश्च परमर्षय ।

—After 13^{ab}, D1–4 12 (after 1384*) 13 read 11 D11 om 13^{c} – 14^{b} —c) Ś1 D1–4 12 13 उरुवातेन, Ñ2 V1 3 B1 3 4 D7 उरुवेगेन, G2 मम वेगेन, M1 प्लवनेनैव, Cr g k t as in text (for प्रवेगेनैव) —d) Ś1 D12 [आ] काशगो महान्, Ñ2 D7 प्रतिकर्षिणा, V1 B1 3 परिकर्षिणा, B4 च विकर्षणा (for प्लवगर्षभा) D1 3 4 भञ्जानाकाशगोचरान्, D2 13 भञ्जानाकाशगान्महान्

14 Ñ1 illeg for 14, D11 om 14^{ab} (for both, cf v l 13) —a) I G1 M2 उत्सहेहम्, Cm g as in text (for °हेयम्) Ñ2 V3 B3 4 परिक्रातु (for अति°) Ś1 D° 12 13 उत्सहे पर्वतान्सर्वांस्, V1 ✱ ✱ रिक्रातु (moth-eaten), B1 उत्सहे सपरिक्रातु, D1 3 4 उ सहे परिसर्पस्तान, D7 उत्सहेह परिक्रातु —b) Ś1 D1–4 12 13 सर्वा (Ś1 D12 तुगा, D2 13 सर्वा) न्पातयितु क्षितौ, B3 सर्वानाकाशगोचरे —After 14^{ab}, Ś1 D1–4 12 13 read 9 and 10 (transp) Ñ2 V1 B1 3 4 D7 om 14^{c} – 15^{b} —c) D6 M3 शोषयिष्यामि (for क्षोभ°) V° D5 8–10 सागरान्शोषयिष्यामि —d) D11 भ्रामयिष्यामि

15 Ñ1 illeg up to प्लवमानो in d (cf v l 13) Ñ2 V1 B1 3 4 D7 om 15^{ab} (cf v l 14) —a) Ś1 D1–4 11–13 पातयिष्यामि, V3 क्षोभ°, D5 6 8–10 T1 M3 चूर्ण° (for कम्प°) —b) G2 वेगेनैव (for प्लवमान) G M1 प्लवगम —D11 repeats 15^{cd} after 16 —c) Ś1 B1 D2 13 तरिष्यामि, V1 D3 6 हरिष्यामि, B3 भविष्यति (sic) (for हरिष्ये च) D1 4 5 8–12 (D11 first time) हृ (D12 त) रिष्यामूरुवेगेन, D11 (second time) हरिष्ये ऊरुवेगेन (with hiatus) —d) D1 महाप्लवं (for °र्णवम्) B3 D11 (first time) प्लवमाने (B3 °न) महार्णवे

16 a) Ś1 Ñ V1 3 B1 3 4 D G2 3 M1 3 विविध (for वीरुधा) ❀ Cr m g पुष्पमिति (Cm °मित्येतद्) जात्येकवचनम्।, Ck पुष्पमित्यनुकर्ष ।, Ct लताना विविध पुष्प पादपाना च पुष्प हरिष्यामीत्यन्वय ❀ —b) D1 महच्चयुत (for च सर्वश) —c) T3 M Cr अनुयास्यति, Ct as in text (for °स्यति) M2 अत्र (for अद्य) —d) D5 प्लवमानो T2 3 G2 M1 2 विहायस (for °सा) —For 16^{cd}, Ś1 Ñ V1 3 B1 3 4 D1–4 7 11–13 subst

1386* अनुबन्धेन पुष्पाणा विविधेन सुगन्धिनाम् ।

[B1 अनुवातेन (for °बन्धेन) D2 मुख्याणा (corrupt) (for पुष्पाणा) V1 B3 D3 4 11 विविधाना (for °धेन) Ñ2 B4 D1–4 7 11 13 सुगधिना]

—Ñ1 illeg for 16^{e} – 28^{b} —e) B1 3 च (for हि) D11 (marg.) न (for मे) —f) Ś1 D3 5 11 12 M1 वायो

चरन्तं घोरमाकाशमुत्पतिष्यन्तमेव च ।
द्रक्ष्यन्ति निपतन्तं च सर्वभूतानि वानराः ॥ १७

महामेरुप्रतीकाशं मां द्रक्ष्यध्वं प्लवंगमाः ।
दिवमावृत्य गच्छन्तं ग्रसमानमिवाम्बरम् ॥ १८

पथा, Ñ2 V1 3 B1 3 4 D7 स्वर्गमार्गे, D2 स्वौ-पथा, D4 स्वर्गपथा (for स्वाते पन्था) B1 [अ]परे (for [अ]म्बरे) ❀ Cv स्वाते पन्थाश्छायापथ ।, Cr स्वाते पन्था इव । परिपूर्णता(रापथश्?) छायापथ इव ।, Cm स्वाते पन्था इव परिपूर्णतारापथ इव, पुष्पानुगतिचिह्नादिति भाव ।, Ck स्वाते पन्था इति । स्वातीपथश्छायापथ इति पर्यायार्थ । स तु प्रकीर्णनक्षत्रक । अस्य पन्थाश्च प्रकीर्णबहुपुष्पक इत्युपमा ।, Ct स्वाते, पन्था इति । स्वातीपथश्छायापथ इत्युच्यते । स तु प्रकीर्णबहुनक्षत्र । मम पन्था अपि प्रकीर्णबहुपुष्पक ❀ —After 16, Ñ2 V1 B1 3 D7 ins, while V3 B4 cont after 1388*, whereas D11 cont l 2 only after 1379*

1387* पार्श्वे तु मलयस्यास्य रम्ये प्रस्रवणे गिरौ ।
त्यजन्तु हरय शोक निर्मोकमिव पन्नगा ।
बल हि सुमहन्मन्ये आत्मन प्लवन प्रति ।
कारण चाभिधास्यामि श्रोतुमिच्छथ तत्परा ।
ततो नि शब्दसवृत्ते विस्तीर्णे ज्ञातिमण्डले ।
पवनस्यात्मज श्रीमान्हनूमान्वाक्यमब्रवीत् ।
तदा किल मया बाल्ये मातुरु सङ्गशायिना ।
जपापीडनिभस्ताम्रो बालसूर्यो निरीक्षित ।
तत्र कौतूहल जात मम स्प्रष्टु दिवाकरम् ।
चापलात्क्षेत्रदोषस्य साफल्यमनुगच्छत ।
जनन्या गिरिसकाशादङ्कादुत्पत्य सत्वर ।
दीर्घं कृत्वात्मन कायमाकाश क्रान्तवानहम् ।
समासाद्य तु दीप्ताशु भास्कर ज्वलनप्रभम् ।
निर्दग्ध पतितस्तेन तस्मिन्नेव शिलोच्चये ।
मया च पतता तत्र स्वैर्गात्रै शर्करीकृतम् ।
शिखर च गिरेस्तस्य शिलाश्च समन शिला ।
तदिद विकृत गात्र हनुदेशे निरीक्ष्यताम् ।
येनास्मिन्कारणेनाह हनूमानिति विश्रुत ।
तदह वानरान्सर्वानङ्गदप्रमुखान्भयात् ।
सुग्रीवान्मोक्षयाम्येको लङ्घनेन महोदधे ।

[(l 1) D7 रम्य (for रम्ये) Ñ2 V3 B4 प्रश्रवणे —(l 3) Note hiatus between the two halves D7 बले (for बल) B3 D7 सुमहान् —After l 3, B1 ins

1387(A)* तदह कथयिष्यामि श्रोतुमर्हथ तत्परा ।

—(l 4) B3 विधास्यामि (for [अ]मि°) Ñ2 B4 D7 अर्हथ (for इच्छथ) V1 B1 3 श्रोतु(B1[marg also] 3 श्रुत)मिच्छामि तत्पर (for the post half) —(l 5) B4 अहो (for ततो) B3 ततो नि शब्द चाहत्य (for the prior half) Ñ2 B3 विस्तीर्ण- (for विस्तीर्णे) Ñ2 V1 क्षिति- (for ज्ञाति-) —(l 6) V1 इदम् (for वाक्यम्) —(l 7) B3 तथा (for तदा) B3 -गामिना (for शायिना) —(l 8) Ñ2 V1 जपापीत-, B4 जपापुष्प (for जपापीड-) D7 तावद् (for ताम्रो) B3 विलोकित (for निरीक्षित) —(l 9) V3 B3 तत (for तत्र) B3 द्रष्टु (for स्प्रष्टु) —(l 10) V1 चापल्य, V3 B3 चापल्यात् (for चापलात्) V1 3 मातुल्यम् (sic), B3 सामर्थ्यम् (for साफल्यम्) V1 B3 अनुगच्छता B1 मार्तण्डमभिगच्छता (for the post half) —(l 11) Ñ2 om अङ्काद् V1 . . . सागर (illeg), B1 उत्पत्याकाश सत्वर (for the post half) —(l 12) B4 देहम् (for कायम) —(l 13) B3 दीप्ताग (for दीप्ताशु) —(l 15) Ñ2 om (subm), B1 वै (for च) —(l 16) B4 चास्य (for तस्य) V3 शिवाश् (for शिलाश्) B3 सुमन शिला —(l 17) Ñ2 विकृते गात्रे, V1 3 D7 विकृत गात्रे —B4 om l 18 —(l 18) Ñ2 V1 3 B1 D7 [अ]स्मि (for [अ]स्मिन्) V1 B1 [इ]ह (for [अ]ह). —B3 om l 19-20 —(l 19) B4 एतान् (for सर्वान्). —(l 20) V3 मोचयामि B4 [ए]प (for [ए]को)]

—Thereafter V3 B4 repeat 17-19 —After 16, D11 repeats 15[cd]

17 Ñ1 illeg for 17 (cf v l 16) D11 om 17[ab] V3 B4 repeat 17-19 after 1387* —[a]) Ñ2 V1 3 B1 3 4 D7 (V3 B4 both second time) विमल (for चरन्त) Ś1 राजयिष्यतमाकाशम्, V3 (first time) D2 12 राजयतमिवाकाशम्, B4(first time) विराजतमिवाकाशम्, D1 3 4 रजयत तथाकाश, D13 राजयत इवाकाशम् —[b]) B4 (first time) D13 उपतिष्ठतम् (for उत्पतिष्यन्तम्) Ñ2 V1 3 B1 3 4 D7 (V3 B4 both second time) हि, D5 6 12 M3 वा (for च) D1.3 4 प्लवमान हरीश्वरा —[c]) Ś1 D2 12 13 सर्वभूतानि, B1 मुनयस्तत्र, D4 नियत त च (for निपतन्त च) D11 सागर नि पतत च —[d]) V1 चातरा, B3 चाद्भुत, B4 (second time) मानवा , D1 नातरा, D3 4 मा प्लुव, D11 मा तदा (for वानरा). Ś1 D2 12 निपतत वनातरात्, V3(second time) सर्वभूतनिशाचरा , D13 निपतत च वानरा

18 Ñ1 illeg for 18 (cf v l 16) V3 B4 repeat 18 (cf v l 17) D11 reads 18 twice —[a]) Ś1 Ñ V1 3 B1 3 4 (V3 B4 both times) D1-4 6 7 11-13 (D11 both times) G M महामेघ- (for महामेरु-) —[b]) Ś1 Ñ V1 3 B1 3 4 (V3 B4 both first time) D1-4 7 11(both times) 12 13 मा(द्रक्ष्यंति वनौ(Ñ2 V1 3 B4 [V3 B4 both second time] D7 द्रिवौ)कस , G M2 3 मा च द्रक्ष्यथ वानरा —[cd]) Ś1 Ñ2 V1 3 B1 4 (V3 B4 second time) D1-4.7 11(both times) 12 13 नभ(D3 4 तत) आ(V3 B4 [both first time]°भ स)वृत्य बाहुभ्या (for °). D2 13 श्वसमानम् (for ग्रस°) V1 3 B1 4 (V3 B4 both second time) इवार्णव (for °म्बरम्) D11 (first time) स्वर्गपथा

विधमिष्यामि जीमूतान्कम्पयिष्यामि पर्वतान् ।
सागरं क्षोभयिष्यामि प्लवमानः समाहितः ॥ १९

वैनतेयस्य वा शक्तिर्मम वा मारुतस्य वा ।
ऋते सुपर्णराजानं मारुतं वा महाबलम् ।
न हि भूत प्रपश्यामि यो मां प्लुतमनुव्रजेत् ॥ २० G 5 3 63 B 4 67 23 L 4 58 57

इवाबरे, G3 ग्रसतमिव चावर (for d) B3 नभो च्यावृत्य बाहुभ्या गूहमानमिवार्णव

19 Ñ1 illeg for 19 (cf v l 16) V3 B4 repeat 19 (cf v l 17) D7 reads in marg from 19 up to निवसतो in l 2 of 1389* —a) Ñ2 B4 (second time) D7 धर्षयिष्यामि, V1 बधयिष्यामि, B1 वदयिष्यामि, D1 विचयिष्यामि —b) V1 illeg from यि to तान् V3 B4 (both first time) D11 मेदिनीं (for पर्वतान्) —D11 om 19cd —c) V1 सागरान् Ñ2 D5 8-10 शोषयिष्यामि (for क्षोभ°) —d) D1 कृतोद्यम, D2 समावृत (for समाहित) V3 B4 (both first time) योजनाना शत प्लुवे (V3 प्लुतें) —After 19, Ś1 V3 B4 (V3 B4 after 19 [first occurrence]) D1 2 12 13 ins, while K(ed) ins within brackets l 1-2 after 20ab

1388* महासहननोपेतौ महान्तौ पुरुषर्षभौ ।
ऋष्यमूकात्पुन शैलादुभौ तौ रामलक्ष्मणौ ।
आनयिष्यामि वैदेह्या सकाश वानरर्षभा ।

[(l 1) V3 B4 महामघट्टनोपात्तो (for the prior half) —(l 2) V3 B4 द्रुत, D1 अह (for पुन) K(ed) ऋश्यमूक पुन शैल (for the prior half) V3 B4 वहेय, K(ed) प्लवेय (for उभौ तौ) —V3 B4 K(ed) om l 3]

—Thereafter V3 B4 cont 1387*

—After 19, Ñ2 V1 (partly moth-eaten) 3 B1 3 4 (V3 B4 after 19 [r]) D3 4 7 ins, Ś1 D1 2 12 13 cont l 4-10 only after 1388*, K(ed) cont l 4 only within brackets after 1388*

1389* मनस्विनोर्धर्मवतो सिंहसहननाङ्गयो ।
ऋष्यमूके निवसतो शूरयो राजपुत्रयो ।
तयो प्रिय करिष्यामि वैदेहीलम्भन महत् ।
आनयिष्यामि वैदेहीं रामस्य महिषीं प्रियाम् ।
प्रसह्य गरुडो भूत्वा पन्नगेन्द्रवधूमिव । [5]
विहरिष्यामि वेगेन नागनक्रझषाकुलम् ।
वितत्य गरुड पक्षौ हरन्निव महोरगम् ।
इहैव मा प्रतीक्षध्व सर्वे वानरपुगवा ।
अहमेतद्गमिष्यामि योजनाना शत द्रुतम् ।
आदित्यचन्द्रचरिते ग्रहनक्षत्रसेविते । [10]

[D7 reads up to निवसतो in l 2 in marg —(l 1) V1 D3 4 महा- (for सिंह) B1 महामयमतिस्तयो (marg also °मिहनिनादिनो and °सहननागयो), B3 महानिंहनिनादयो (for the post half) —(l 3) B3 प्रीतिं तयो, B4 तयो प्रीतिं, D3 4 सोऽह प्रिय, D7 तयो प्रति (for तयो प्रिय) B4 -मागणे (for -लम्भन) —D1 om l 4 —(l 4) K(ed) नून नेष्यामि (for आनयि°) Ś1 D2 12 13 ता देवी (for वैदेहीं) B3 om रामस्य —G(ed) om l 5 —(l 5) Ś1 D1 2 12 13 भुजग भीम, D3 4 गरुडो भीमो (for गरुडो भूत्वा) D3 4 भुजगेंद्र- (for पन्नगेन्द्र-) Ś1 D2 12 13 गरुत्मान्सागराद्यथा, D1 गरुड सागराद्यथा (for the post half) —G(ed) transp l 6 and l 7 —(l 6) V3 विधमिष्यामि, D1 3 4 विक्रमि° (for विहरि°) Ś1 D3 4 12 नाना-, B1 तिमि- (for नाग) Ś1 D2 12 13 -ममाकुल, Ñ2 B3 -झषालय, B1 ममालय D7 रुषालय (sic) (for -झषाकुलम्) D1 तथाह वरुणालय, G(ed) आकाश विहगालय (for the post half) —D1 om l 7 —(l 7) B1 4 विस्तृत्य, B3 विसृज्य, D3 4 7 विवृत्य (for वितत्य) Ñ2 [illegible] ड पक्षौ (illeg) (for the prior half) V3 महार्णव (for महोरगम्) —(l 8) B3 मत्त्व (for इहैव) Ś1 D12 मप्रतीक्षध्व (for मा प्र°) Ś1 D2 12 13 -यूथपा (for -पुगवा) —After l 8, D3 4 ins

1389(A)* यावद्राघवपत्नीं तामानयामि यशस्विनीम् ।
निरालम्बनमाकाश सिद्धचारणसेवितम् ।

—(l 9) V1 B1 एत, B4 एव (for एतद्) D1 अहमेवागमिष्यामि (for the prior half) —(l 10) V3 B3 4 -चरिते देशे (B3 मार्गे) (for -चन्द्रचरिते) D1 -शोभिते (for -सेविते)]

